# Shri Chellurapurisha Stava

# શ્રીચેલ્લૂરપુરીશસ્તવઃ

## Document Information

Text title : Shri Chellurapurisha Stava 08 30

File name : chellUrapurIshastavaH.itx

Category : devii, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-30

Latest update : August 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીચેલ્લૂરપુરીશસ્તવઃ

લક્ષ્મીવિદ્યુદ્વિલાસઃ પ્રસૃમરકરુણાસારવર્ષપ્રકર્ષઃ
    કુર્વાણો નીલકણ્ઠં પ્રમદપરવશં ચન્દ્રકોદ્ભાસમાનમ્ ।
સચ્ચેતશ્ચાતકાનાં સપદિ વિરચય ન્ધારયાનન્દપૂરં
    દૃષ્ટોઽયં સઙ્ગમાખ્યે મહતિ પુરવરે શ્યામલઃ કોઽપિ મેઘઃ ॥ ૧॥

ચિત્રં જનાઃ શ‍ૃણુત સઙ્ગમરઙ્ગભાજો
    લક્ષ્મીસખસ્ય પુરતઃ પુરુષોત્તમસ્ય ।
મધ્યેકુલીપિનિ નિમજ્ય ભવામ્બુરાશે-
    રુદ્ધૃતપઙ્કુમુદમજ્જિ મયા કિમેતત્ ॥ ૨॥

કર્ણાયુષ્યમુદઞ્ચયત્યહરહઃ શ્રીશમ્બરાધ્યાસિનો
    બાલસ્યામ્બુદમેચકસ્ય મધુરો વેણુધ્વનિર્વિશ્રુતઃ ।
વૃક્ષાન્ પલ્લવયન્ શિલાસ્તરલયન્નમ્ભાંસિ ચ સ્તમ્ભયન્
    ગોપસ્ત્રીકુચમણ્ડલીઃ પુલકયંસ્તાપત્રયં ખણ્ડયન્ ॥ ૩॥

તેજાંસિ માનસે મે દૃઢકુચકુમ્ભાનિ દલિતસુમ્ભાનિ ।
વિદ્યાત્મકાનિ કાન્યપિ વિદ્યન્તે કાન્તિતુલિતવિદ્યુન્તિ ॥ ૪॥

જનનમરણક્લેશચ્છેદાય જાગ્રતિ તાવકે
    ચરણકમલે માતર્હા હન્ત મોહવશાદહમ્ ।
અધનિકસદનં ધાવન્ધાવં નિજોદરભસ્ત્રિકા-
    ભરણવિધયે કષ્ટં કષ્ટં ભ્રમામિ કિયચ્ચિરમ્ ॥ ૫॥

ઉત્પન્નમાત્રક્ષણમુક્તમાયા-
    સ્ત્રૈણત્ય વિષ્ણોઃ સ્તનપાનલોભાત્ ।
મુધૈવ ચુન્બન્તમુરો મુખેન
    શાસ્તારમીડે સકલાર્થસિદ્ધ્યૈ ॥ ૬॥

યહોરન્તરમમ્બુરાશિસુકૃતોન્મેષેણ શ‍ૃઙ્ગારિતં

યન્નાભીકમલે ચરન્મધુકરો નિર્માદુમીષ્ટે જગત્ ।
યન્નેત્રદ્વયમાતનોતિ જગતાં નક્તન્દિનાપ્રક્રમં
નાવાક્ષેત્રવિહારિણી વિજયતે કાચિન્મહઃપ્રાચુરી ॥ ૭॥

શબ્દબ્રહ્મચણં યદીયતલિમં છન્દાંસિ યદ્વાહનં
વક્ષો યસ્ય મહામ્બુરાશિતપસાં પાકેન કલ્લોલિતમ્ ।
વિશ્વોત્પત્તિનિદાનસૂતિસદનં યન્નાભિપકેરુહં
સોઽયં કોઽપિ મુરારિનામનિ પુરે દેવો દરીદૃશ્યતે ॥ ૮॥

પ્રાદુસ્સન્તુ પુરઃ પુરત્રયવધૂબિબ્બોકસમ્પદ્દ્રુહઃ
શ્રીચેલ્લૂરપુરીનિવાસરસિકારતેજોવિલાસા મમ ।
યેષુ ધ્યાનપથં ગતેષુ ભવિતા નૃણાં ફણી ભૂષણમ્ ।
વામાઙ્ગં વનિતા દિશશ્ચ વસનં ભાગીરથી માલિકા ॥ ૯॥

યે ધ્યાયન્તિ નિષેદુષીમુપપટં વ્યાખ્યાનમુદ્રાસખીં
મૂર્તિં તે મુનિમાનસૈકસુગમાં મુગ્ધેન્દુચૂડામણે ।
તેષામાશુ વિનિઃસરન્તિ વદનાત્ સઙ્ક્રન્દનારામભૂ-
મન્દારદ્રુમકોરકસ્રુતસુધામાધુર્યધુર્યા ગિરઃ ॥ ૧૦॥

ઉત્કૂલપ્રણયાતિરેકમુદયદ્રોમાઞ્ચપુઞ્જં મુહુઃ-
પ્રત્યાખ્યાનપરૈકભાગવચનં ચેલ્લૂરપુર્યામહો ।
નીવીસ્પર્શવિલોલદક્ષિણકરવ્યાપારરોધક્રિયા-
વૈયગ્ર્યાકુલવામપાણિ શિવયોરૈક્યં પરિક્રીડતે ॥ ૧૧॥

નીહારાહાર્યકન્યામૃદુલભુજલતાલિઙ્ગનોત્કણ્ઠકણ્ઠઃ
ખણ્ડં બિભ્રત્કિરીટે કમપિ કુવલયાનન્દનાડિન્ધમાંશુમ્ ।
બ્રહ્મક્ષેત્રે પવિત્રે પરિચિતકરુણઃ પોરસ્કુરીત્યાશ્રિતાનાં
નિર્ભિન્દન્ મોહબન્ધાનકૃતકવચસાં નિશ્ચિતઃ કશ્ચિદર્થઃ ॥ ૧૨॥

ઘોરઘ્રાણમુદગ્રહુઙ્કૃતિમિલદ્ધર્મામ્બુ લમ્બાધરં
વ્યાવિદ્ધભ્રુકુટીકઠોરનિટિલં વાન્તસ્ફુલિઙ્ગેક્ષણમ્ ।
વિદ્યુત્પાટલકેશમુગ્રદશનં વિષ્ટબ્ધકર્ણદ્વયં
વક્ત્રં મૃત્યુભટસ્ય શઙ્કર નહિ ત્વદ્ભક્તિમાન્ પશ્યતિ ॥ ૧૩॥

ભજત જનનીમેકાં લોકત્રયસ્ય દયામયીં
પતત સુધિયો મા મા ભીમે પુનર્ભવવારિધૌ ।
અકૃતકવચોવેદ્યામાદ્યામપા (ઙ્ગિત) શઙ્કરાં

મૃદિતમહિષાં મુક્તિક્ષેત્રે મુકુન્દસહોદરીમ્ ॥ ૧૪॥

બ્રહ્મક્ષેત્રેશ શમ્ભો ત્વદપરમમરં યદ્યહં વર્ણયિષ્યે
કણ્ઠે કુણ્ઠપ્રચારં સ્ખલતિ મમ વચો જાલકર્મીલદર્થં (?) ।
તિષ્ટૂષે ચેદ્ભવન્તં ત્રિપુરહર ગિરાં મન્મુખામ્ભોજગર્ભાત્
જૃમ્ભન્તે કેऽપિ ગુમ્ભા બલમથનધુનીપદ્ધતિસ્પર્ધિનીનામ્ ॥ ૧૫॥

ભૂધરાધિપસુતામુખપદ્મપ્રભ્રમદ્ભ્રમરવિભ્રમનેત્રઃ ।
બોભવીતિ ભવભીતિવિભેદી શ્રીવિભીતકપુરે પુરમાથી ॥ ૧૬॥

યોગીન્દ્રમાનસસરોરુહષટ્પદાય
શૈલેન્દ્રજાનયનષટ્પદપઙ્કજાય ।
અજ્ઞાનરૂપતિમિરૌઘદિવાકરાય
ભક્તાર્તિભઞ્જનપરાય નમો નમસ્તે ॥ ૧૭॥

મુહુર્ભિન્તાદિન્દુર્મકુટગૃહમેધી પુરરિપોઃ
પરક્રોડક્રીડાનિલયનજુષો મોહતિમિરમ્ ।
કુચે ગૌર્યા હારા ઇવ મૃદુલહાસા ઇવ મુખે
નવા મલ્લીમાલા ઇવ કચભરે યસ્ય કિરણાઃ ॥ ૧૮॥

કાણાઃ કિં કઙ્કણસ્ય ત્રિપુરવિજયિનો નૃત્યતશ્ચિત્તરઙ્ગે
કિં વા તસ્યૈવ ચૂડાઘુમુઘુમિતવિયદ્વાહિનીવીચિરાવાઃ ।
આહોસ્વિદ્વક્ત્રખેલત્કમલજમહિલાશ્રોણિકાઞ્ચીનિનાદા
વાચસ્તે વિક્રમક્ષ્માવલમથન મુખામ્ભોરુહાન્નિસ્સરન્તિ ॥ ૧૯॥

કર્ણં સાવર્ણમર્ણોમુચમમિતશુચં દીનવાચં દધીચં
ચિન્તાલગ્નં ધુરત્નં શિબિમપશિવિકં સ્વર્ગવીં (પઙ્) ગુવીર્યામ્ ।
શશ્વદ્વિશ્રાણનશ્રીઃ શિવ શિવ દિવિષદ્દ્રૂન્ વિષદ્રૂન્ વિધત્તે ।
વિશ્વોત્તીર્ણસ્ય વિશ્વમ્ભરચરિતનિધે વિક્રમક્ષ્માપતે તે ॥ ૨૦॥

પ્રક્રીડત્કાર્તવીર્યાર્જુનભુજવિધૃતોન્મુક્તસોમોદ્ભવાગભ-
સ્સમ્ભારક્ષોભસમ્ભેદનચતુરવચોગુમ્ભગમ્ભીરિમશ્રીઃ ।
તુણ્ડીરક્ષોણિખણ્ડાદિહ તવ વિષયેऽહિણ્ડતોદ્દણ્ડસૂરિઃ
સોऽયં તે વિક્રમક્ષોણિપ કિમુ ન ગતઃ શ્રોત્રિયઃ શ્રોત્રદેશમ્ ॥ ૨૧॥

પુષ્ણન્નેવમહર્નિશં દ્વિજગણાન્ મૃષ્ટાન્નદાનક્રમૈઃ
શ્રીકણ્ઠક્ષિતિપાલ જીવતુ ભવાનાચન્દ્રમાતારકમ્ ।

સ્તાવં સ્તાન્દમમી વયં ચ ભવતઃ કીર્તિં દિશં દક્ષિણા-
    માઢૌક્ય પ્રતિયામ કૈરપિ દિનૈઃ કર્તું પુનર્દર્શનમ્ ॥ ૨૨॥

દૃષ્ટં મયા મણિકવાટપુટાન્તરાલે
    શ્રુત્યન્તચુમ્બિનયનોદિતકામતન્ત્રમ્ ।
મુગ્ધસ્મિતાઙ્કુરવિકસ્વરગણ્ડમૂલ-
    મુદ્યન્મૃગાઙ્કુરુચિરં મુખમુત્તરાયાઃ ॥ ૨૩॥

બદનગલિતલાલં માતુરુત્સઙ્ગલોલં-
    તરલચિકુરજાલં સ્તન્યપાનાનુકૂલમ્ ।
નિખિલભુવનમૂલં ચેતસા સાર્વકાલં
    બલભિદુપલનીલં બાલમાલોકયામઃ ॥ ૨૪॥

જીયાસુર્જનિધર્મતપ્તસુમનશ્ચેતઃસુધાવૃષ્ટયો
    માયાવલ્લવબાલકસ્ય મધુરા વંશીનિનાદાકુરાઃ ।
યે શશ્વત સ્થગયન્તિ ગોપસુદૃશાં નીરન્ધ્રરોમોદ્ગમ-
    શ્રેણીકઞ્ચુલિભિર્વિમૂઢમનસાં સ્રસ્તોત્તરીયાન્ કુચાન્ ॥ ૨૫॥

અઙ્ગણે ઘટિતરિઙ્ખણં ચલિતકિઙ્કિણીકૃતઝણઝણં
    ચઞ્ચલાલકકુલાકુલં તરલલોચનં જનનમોચનમ્ ।
અઙ્કુરદ્વિશદદન્તકુડ્મલવિલોભનીયવદનામ્બુજં
    શમ્બરે કમપિ ચિન્તયામિ શિશુમિન્દ્રનીલમણિમેચકમ્ ॥ ૨૬॥

આકુલાકુલવિનીલકુન્તલં ગોકુલાનુગતિકેલિલાલસમ્ ।
આકપોલમનુલિપ્તકજ્જલં લોકપાલકમુપૈમિ બાલકમ્ ॥ ૨૭॥

વ્યત્યાસાહિત પાદયાપિ વલિતગ્રીવાભિરામશ્રિયા
    સત્યાનન્દઘનસ્વરૂપવપુષઃ સ્થિત્યા જગન્મોહયન્ ।
વંશારાવસુધારસૈરપહરન્ સંસારતાપં સતા
    ઉત્તંસાયિતબર્હભારસુભગઃ કંસારિરાસ્તાં મુદે ॥ ૨૮॥

ચઞ્ચલીકરણમઞ્જુકુઞ્ચિતઘનાલકં બ્રજનિતમ્બિની-
    ચઞ્ચલીકરણકેલિદુર્લલિતવેણુમુદ્રિતમુખામ્બુજમ્ ।
પિઞ્છભારકૃતભૂષણં મધુરભાષણં દુરિતમોષણં
    વઞ્ચનાકલિતગોપવેષમુરરીકરોમિ પરપૂરુષમ્ ॥ ૨૯॥

ઉત્તરલલોચનમુલૂખલનિબદ્ધં

ભગ્નયમલાર્જુનમસજ્જનવિદૂરમ્ ।
જાનુકૃતચઙ્ક્રમણસઙ્કુલકરાબ્જં
ધ્યાયત નમસ્કુરુત ગાયત કિશોરમ્ ॥ ૩૦॥

ધામપિ પિઙ્ગલાં ચ યમિનઃ કૃત્વા સુષુમ્નાપથે
યત્નાદ્વાતમનાહતસ્નુતસુધાસ્વાદાનુસન્ધાયિનઃ (?) ।
સત્યં જ્ઞાનમનન્તમુત્તમગુણં ધ્યાયન્તિ યત્તત્પદં
તદ્બ્રહ્માણિ નનુ ત્વમેવ નિગમૈર્ગૌરીશ જેગીયસે ॥ ૩૧॥

વ્યક્તાવ્યક્તમિદં જગત્પ્રભવતિ ત્વત્તઃ પરં જ્યોતિષઃ
તત્સર્વં સ્વયમાત્મનો મહિમતઃ સંવ્યાપ્ય સન્ત્રાયસે ।
ઉત્પત્તિક્રમતસ્તથૈવ તદિદં ત્વય્યેવ સંલીયતે
ચેલ્લૂરેશ્વર દુર્વિગાહમહહા ચિત્રં ચરિત્રં તવ ॥ ૩૨॥

નેચ્છા તુચ્છતરે નરેન્દ્રવિભવે નાપિ સ્મરસ્મેરદૃ-
ગ્ગૌરાઙ્ગીપરિભોગકેલિષુ ન ચ સ્વર્ગાધિરાજ્યોદયે ।
નો તત્રાપ્યપવર્ગકુટ્ટિમપરિક્રીડાસુ કિં ત્વન્વહં
સેવાયૈ સ્પૃહયામિ કેવલમહં ચેલ્લૂરપુર્યાઃ પ્રભોઃ ॥ ૩૩॥

યાચે કિઞ્ચિદિદં કૃતાઞ્જલિપુટં ચેલ્લૂરપુર્યાઃ પતે
સ્વામિન્ વારય ચન્દ્રશેખર કૃપાવારાન્નિધે મામકીમ્ ।
દ્વિત્રગ્રામટિકાધિપત્યકલિતાહમ્ભાવશુમ્ભન્મતિ-
ક્ષુદ્રક્ષ્માધવચાટુકોટિઘટનાદૈન્યસ્ય દોગ્ધ્રીં દશામ્ ॥ ૩૪॥

કણ્ઠગ્રાહિકફે સ્ખલદ્ગિરિ ચલદ્બોધે ગલન્મારુતે
મીલચ્ચક્ષુષિ વેપમાનહૃદયે કાલે સતિ પ્રસ્તુતે ।
આરુહ્ય સ્વયમદ્રિરાજસુતયા સાકં મહાશાકરં
સ્વામિન્ શઙ્કર સન્નિધેહિ કૃપયા ચેલ્લૂરભૂષામણે ॥ ૩૫॥

ભિન્તા હૃન્મૌઢ્યમાઢ્યઙ્કુરણમહિકુલગ્રામણીદામનદ્ધં
મુગ્ધં મૂર્ધસ્થલં તે કપિશરુચિજટામણ્ડનં કુણ્ડનાથ ।
યુદ્ધક્રીડત્સુભદ્રાસહચરમહિતારમ્ભદોસ્તમ્ભઘૂર્ણ-
દ્ગાણ્ડીવોદ્દણ્ડદણ્ડાહતિઘટિતકિણગ્રન્થિલં ચન્દ્રમૌલે ॥ ૩૬॥

મજ્જન્તો માર્ષ્ટુકામા ઇવ મદનવધૂનવ્યવૈધવ્યદાના
દુદ્ભૂતં પાતકૌઘં મુકુટતટવિયદ્વાહિનીવારિપૂરે ।
કુર્વાણા ભૂષણાહિવ્રજફણફલકે દીપ્રમાણિક્યશઙ્કાં

પિઙ્ગા નેત્રસ્ફુલિઙ્ગા ઝટિતિપશુપતે ભસ્મયન્ત્વસ્મદંહઃ ॥ ૩૭॥

પાદાઙ્ગુષ્ઠં પુરારેર્ભજત નવલતાપલ્લવાગ્રાન્મ્રદિષ્ઠં
ક્રીડાસ્પર્શેન યસ્ય પ્રચયિતશિખરન્યઞ્ચિતે રાજતાદ્રૌ ।
અસ્તવ્યસ્તારકેશોત્તરલદશમુખીદારુણાક્રન્દભિન્ન-
બ્રહ્માણ્ડો ભૂમિપૃષ્ઠોલ્લુઠિતભુજવનઃ પઙ્ક્તિકણ્ઠો જિહિણ્ડે ॥ ૩૮॥

આબદ્ધભ્રુકુટીવિભઙ્ગમજહત્કૌર્યાઙ્કુરં કિઙ્કરં
ભો ભો શ્રાદ્ધપતે વૃથા મમ કૃતે મા જિત્વરં તત્વરઃ ।
પાદાબ્જં પરિભાતિ ચેતસિ પરક્રોડેશિતુર્ધૂર્જટેઃ-
પૂર્વં યેન ભવદ્ભુજાન્તરશિલાકુટ્ટાકટઙ્કાયિતમ્ ॥ ૩૯॥

કણ્ઠે કફૈઃ કબલિતે કરણે સકમ્પે
નેત્રે નિમીલતિ મરુત્યપિ મન્દમન્દે ।
સદ્યઃ કણકનકનૂપુરચારુ માતઃ
પ્રત્યક્ષમસ્તુ ચરણં પરિપાટલં તે ॥ ૪૦॥

સ્ફુરન્તિ મમ ચેતસિ દ્યુતિનિરસ્તકઙ્કેલયો
દૃગઞ્ચલનિયન્ત્રિતત્રિદશવાહિનીમૌલયઃ ।
દુરન્તદુરિતાચલપ્રકરભેદદમ્ભોલયઃ
કુસુમ્ભરુચિરાધરાઃ કુચભરાનતાઃ કેલયઃ ॥ ૪૧॥

મકરન્દતુન્દિલશરં મધુરિમધૌરેયચારુકોદણ્ડમ્ ।
પાશસૃણિપાણિ કિઞ્ચન પાશુપતં ભાગ્યમાવિરસ્તુ પુરઃ ॥ ૪૨॥

કરતલકલિતેક્ષુકાર્મુકાણાં
કમલકુલારિકલાવતંસિતાનામ્ ।
પશુપતિતપસાં પચેલિમાનાં
પરિચયવાનહમસ્મિ પાટલિમ્નામ્ ॥ ૪૩॥

કૃત્તિધરહસ્તલાલિતનિસ્તુલકુચવિજિતહસ્તિમસ્તરુચિ ।
મુક્તિપુરે નિસ્તિમિરં મુગ્ધકુરઙ્ગાક્ષમસ્તિ વસ્તુ પરમ્ ॥ ૪૪॥

જય જય પોર્કલિમાતરુમે તરુણારુણકોટિવિમાનરુચે
જગદભયઙ્કર શઙ્કરભામિનિ કિઙ્કરિતામરિ તુઙ્ગકુચે ।
ભવભયકમ્પિનિ સુમ્ભનિસુમ્ભનિસુમ્ભનસમ્ભૃતચણ્ડતનો
ત્રિભુવનપાલિનિ ઘોરકપાલિનિ શૂલિનિ ખેલિનિ પાલય મામ્ ॥ ૪૫॥

સમધિકદુર્મદમેદુરદારુકદાનવદારુવિદારવિધા-
    ચટુલકઠોરકુઠારકૃપાણતરાલિતપાટલપાણિતલામ્ ।
પ્રણમત પોર્કલિમાતરમાતુરચાતકજાતપયોદઘટાં
    ધવલસટાકુલભાસુરકેસરિકણ્ઠગતામવિકુણ્ઠકૃપામ્ ॥ ૪૬॥

દિનમુખજૃમ્ભભૃદમ્બુજસમ્ભૃતદમ્ભસમૃદ્ધ્યુદરમ્ભરિદૃગ-
    વલનનિગુમ્ભિતશમ્બરશાસનતન્ત્રનિયન્ત્રિતશઙ્કરયા ।
નિલયિતમસ્તુ મનસ્તુ કયાચન હસ્તિપનિસ્તુલમસ્તજયિ-
    સ્તન(વિ) (યુગ)ભુગ્નવિલગ્નવલત્ત્રિવલીલવલીકુલયા કલયા ॥ ૪૭॥

પરિચરણાચરણોચિતખેચરરાજપુરીચરચન્દ્રમુખી-
    કરકલચાલિતચામરકોરકમારુતપોતકધૂતકચે ।
સપદિ વિજૃમ્ભય સમ્પદમમ્બ ભયં પરિકમ્પય કિઞ્ચ દૃશા
    ક્ષણમનુકમ્પય શમ્ભુકુટુમ્બિનિ તુઙ્ગનિતમ્બિનિ કમ્બુગલે ॥ ૪૮॥

ઇતિ શ્રીચેલ્લૂરપુરીશસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Rajesh Thyagarajan

*Shri Chellurapurisha Stava*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*